শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদধ্যাত্মরামাযণে যুদ্ধকাণ্ডে ব্রহ্মদের কৃতা

॥ শ্রীরামস্তুতিঃ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রীরামস্তুতিঃ ॥

ৱন্দে দেৱং ৱিষ্ণুমশেষস্থিতিহেতুং
ৎৱামধ্যাত্মজ্ঞানিভিরন্তর্হৃদি ভাৱ্যম্।
হেযাহেযদ্বন্দ্বৱিহীনং পরমেকং
সত্তামাত্রং সর্ৱহৃদিস্থং দৃশিরূপম্॥ **1** ॥

প্রাণাপানৌ নিশ্চযবুদ্ধ্যা হৃদি রুদ্ধ্বা
ছিত্ত্বা সর্ৱং সংশযবন্ধং ৱিষযৌঘান্।
পশ্যন্তীশং যং গতমোহা যতযস্তং
ৱন্দে রামং রত্নকিরীটং ররিভাসম্॥ **2** ॥

মাযাতীতং মাধৱমাদ্যং জগদাদিং
মানাতীতং মোহৱিনাশং মুনিৱন্দ্যম্।
যোগিধ্যেযং যোগৱিধানং পরিপূর্ণং
ৱন্দে রামং রঞ্জিতলোকং রমণীযম্॥ **3** ॥

ভাৱাভাৱপ্রত্যযহীনং ভৱমুখ্যৈ -
র্যোগাসক্তৈরর্চিতপাদাম্বুজযুগ্মম্।
নিত্যং শুদ্ধং বুদ্ধমনন্তং প্রণৱাখ্যং
ৱন্দে রামং ৱীরমশেষাসুরদারম্॥ **4** ॥

ৎৱং মে নাথো নাথিতকার্যাখিলকারী
মানানীতো মাধৱরূপোঽখিলধারী।
ভক্ত্যা গম্যো ভাৱিতরূপো ভৱহারী
যোগাভ্যাসৈর্ভাৱিতচেতঃসহচারী॥ **5** ॥

ৎরামাদ্যন্তং লোকততীনাং পরমীশং
লোকানাং নো লৌকিকমানৈরধিগম্যম্।
ভক্তিশ্রদ্ধাভারসমেতৈর্ভজনীযং
রন্দে রামং সুন্দরমিন্দীররনীলম্॥ **6**॥

কো রা জ্ঞাতুং ৎরামতিমানং গতমানং
মাযাসক্তো মাধর শক্তো মুনিমান্যম্।
রৃন্দারণ্যে রন্দিতরৃন্দারকরৃন্দং
রন্দে রামং ভরমুখরন্দ্যং সুখকন্দম্॥ **7**॥

নানাশাস্ত্রৈর্রেদকদম্বৈঃ প্রতিপাদ্যং
নিত্যানন্দং নির্রিষযজ্ঞানমনাদিম্।
মৎসেরার্থং মানুষভারং প্রতিপন্নং
রন্দে রামং মরকতরর্ণং মথুরেশম্॥ **8**॥

শ্রদ্ধাযুক্তো যঃ পঠতীমং স্তরমাদ্যং
ব্রাহ্মং ব্রহ্মজ্ঞানরিধানং ভুরি মর্ত্যঃ।
রামং শ্যামং কামিতকামপ্রদমীশং
ধ্যাৎরা ধ্যাতা পাতকজালৈর্রিগতঃ স্যাৎ॥ **9**॥

॥ শ্রীরামস্তুতিঃ সমাপ্তা ॥